**DAYANAND ANGLO VEDIC PUBLIC SCHOOL , AIROLI**
**SESSION -2024-25**
**FIRST TERM SAMPLE QUESTION PAPER**
**SUBJECT – SANSKRIT(119)**
**STD - X**

सामान्यनिर्देशा: -

1 . कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्टानि सन्ति एवं च 18 प्रश्ना: सन्ति |
2 . अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
3 . प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4 . उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांक: अवश्यं लेखनीय:।
5 . प्रश्नस्य क्रमांक: प्रश्नपत्रानुसारं एवं लेखनीय:।
6 . सर्वेषाम् प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लेखनीयानि।
7 . प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया:।

**भाग: 'क' - 1 - प्रश्नसंख्या 1**
**भाग: 'ख' - 3 - प्रश्नसंख्या 2 - 4**
**भाग: 'ग' - 7 - प्रश्नसंख्या 5 - 11**
**भाग: 'घ' - 7 - प्रश्नसंख्या 12 - 18**

## भाग: 'क'

## अपठितावबोधनम्

**1 . अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत |** **10**

एकदा शरीरस्य सर्वाणि इन्द्रियाणि - हस्तौ , पादौ , मुखं , नासिका , कर्णौ इत्यादीनि मिलित्वा अचिन्तयन् - " वयं सर्वे प्रतिदिनं परिश्रमं कुर्म: | एतद् उदरं सर्वं स्वीकरोति | स्वयं किमपि कार्यं न करोति | अद्यप्रभूति वयमपि कार्यं न करिष्याम: | एवं चिन्तयित्वा सर्वाणि अङ्गानि कार्यम् अत्यजन् | पादौ स्थिरौ भूत्वा अतिष्ठताम् | हस्तौ निश्चलौ अभवताम् | मुखम् अन्नकण: अपि न प्राविशत् | एवं द्वे दिने व्यतीते जाते | शनै: सर्वाणि अङ्गानि शिथिलानि अभवन् | कार्यशक्ति: क्षीणा अभवत् | कथमपि पुन: मिलित्वा विचारम् अकुर्वन् - " अहो ! अस्माकं प्रमाद: | भुक्तस्य अन्नस्य पाचनं तु उदरमेव करोति | एतद् एव अस्मभ्यं शक्तिं ददाति | अस्य कृपया एव वयं जीवाम: | अत: अस्माभि: सर्वै: अनेन सह सहयोग: करणीय: |" नूनं संहति: एव कार्यसाधिका |

**अ) एकपदेन उत्तरं लिखत -( केवलं प्रश्नद्वयकम्)** **1×2= 2**

1) कार्यसाधिका का भवति ?
2) कीदृशस्य अन्नस्य पाचनं उदरमेव करोति ?
3) एकदा कस्य इन्द्रियाणि मिलित्वा अचिन्तयन् ?

**आ) पूर्णवाक्येन उत्तरं लिखत - ( केवलं प्रश्नद्वयकम्)** **2×2= 4**

1) कानि कानि अङ्गानि मिलित्वा कार्यं अत्यजन् ?
2) कस्य कृपया अङ्गानि शक्तियुक्तानि भवन्ति ?
3) शनै: कानि शिथिलानि अभवन् ?

**इ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत |** **1**

**ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम् )** **1×3= 3**

1) **'वयं सर्वे प्रतिदिनं परिश्रमं कुर्मः ।'** अस्मिन् वाक्ये क्रियापदस्य किं कर्तृपदम् प्रयुक्तम् ?

(क) प्रतिदिनं (ख) वयम् (ग) परिश्रमं (घ) कुर्मः

2) **'आलस्यम्'** इति पदस्य किं विलोमपदं प्रयुक्तम् ?

(क) प्रमादम् (ख) विचारम् (ग) शिथिलम् (घ) परिश्रमम्

3) **'हस्तौ'** इति विशेषणस्य किं विशेष्यपदं अत्र प्रयुक्तम् ?

(क) शनैः (ख) कर्णौ (ग) पादौ (घ) निश्चलौ

4) **'बलम्'** इत्यर्थे किं पदं प्रयुक्तम् ?

(क) अङ्गानि (ख) उदरम् (ग) शक्तिः (घ) कार्यम्

## 'ख' भागः

## रचनात्मकं कार्यम् (15 अङ्काः)

**2 . भवतः अनुजः रमेशः पठनं त्यक्त्वा चलदूरभाषयन्त्रेण क्रीडने सर्वदा व्यस्तः भवति । तं पठनार्थं प्रेरयन् लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा पुनः लिखत ।** **½×10= 5**

परीक्षाभवनात्

तिथिः ---------

प्रिय (1) ------------------ !

शुभाशीषः ।

ह्यः एव मातुः (2) ----------- प्राप्तम् । माता अद्यत्वे पठने तव (3) --------------- दृष्ट्वा चिन्तिता अस्ति । त्वं पठनं त्यक्त्वा चलदूरभाषयन्त्रेण (4) ---------रतः भवसि । अर्धवार्षिक-परीक्षायाम् अपि तव (5) ------- न्यूनाः आगताः । एतद् तु न (6) ------------------ । यद्यपि क्रीडनम् अपि (7) --------------- आवश्यकं परं तत् शारीरिकं भवेत् । क्रीडनेन सह पठनम् अपि अत्यावश्यकम् । ये चलदूरभाषयन्त्रेण अत्यधिकं समयं वृथा यापयन्ति ते न केवलं (8) ------------- अस्वस्थाः भवन्ति अपितु जीवने असफलाः अपि । अतः मम (9) --------- अस्ति यत् समयस्य महत्त्वम् अवगत्य (10) -------------- ध्यानेन पठ ।

मातपितृचरणयोः मे प्रणामाः कथनीयाः ।

तव अग्रजः

महेशः

**मञ्जूषा**

| |
|---|
| **मानसिकरूपेण , क्रीडने , रमेशः , पत्रम् , त्वम् ,उचितम् , स्वास्थाय , अरूचिम् , अङ्काः , परामर्शः** |

**3 . प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत-** **1×5= 5**



**मञ्जूषा**

| |
|---|
| **गणेशोत्सवः , पूजनम् , फलानि , नत्वा , बालकः , महिला , पुरूषः , सज्जिभवनम् ,जनाः ,पुरतः , विद्यायाः देवता ,कुर्वन्ति , महाराष्ट्रराज्ये , पर्वम् , मिष्ठान्नम् , मन्यन्ते** |

**अथवा**

**निम्नलिखितं विषयम् अधिकृत्य मञ्जूयाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -**

**"क्रीडामहोत्सवः"**

**मञ्जूषा**

| |
|---|
| **प्रतिवर्षम् , दिसम्बरमासे , विविधखेलानाम् , अनेकाः क्रीडकाः , विद्यालयक्रीडाक्षेत्रे , आयोजनम् ,आगच्छन्ति, भ्रमणचषकम् , पारितोषिकाः , उत्तमः क्रीडकः , उत्साहः , परिश्रमम् , निष्ठा** |

**4 . अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत -** **½×10= 5**

अस्ति कस्मिंश्चित् प्रदेशे महान् न्यग्रोधस्य (1) ---------- | तत्र काकः काकी च स्वपरिवारेण सह (2) ---------- | काकः काकी च शावकान् स्नेहेन पालयतः स्म | तस्मिनेव वृक्षविवरात् निष्क्रम्य एकः(3) ---------- सदैव तदपत्यानि भक्षयति स्म | ततस्तौ काकः काकी च (4) ---------- अकुरूताम् | काकः तदनन्तरं (5) ---------- विनाशस्य उपायम् अचिन्तयत् | काकः (6) ---------- कथयति - राजकुमारः सैनिकैः सह प्रतिदिनं सरोवरे (7) ---------- आगच्छति | तदा सः स्ववस्त्राणि आभूषणानि अवतार्य एकस्यां (8) ---------- स्थापयति तदा त्वं राजकुमारस्य कनकसूत्रं गृहीत्वा सर्पस्य कोटरे क्षिप |काकी एवमेव अकरोत् | काकी राजकुमारस्य (9) ---------- गृहीत्वा कोटरे अक्षिपत् | राजसैनिकाः काकीम् अनुसरन्तः वृक्षकोटरस्य समीपम् अगच्छन् | सैनिकाः कोटरे कृष्णसर्पं दृष्ट्वा तस्य वधम् अकुर्वन् | एवं दुष्टसर्पं (10) ---------- दृष्ट्वा काकः काकी च निश्चितौ अभवताम् |

**मञ्जूषा**

| |
|---|
| शिलायाम् ,बहुविलापम् ,विशालवृक्षः , मृतम् , वसति स्म , कनकसूत्रं ,कृष्णसर्पस्य ,काकीम् ,कृष्णसर्पः ,स्नानाय , |

**अथवा**

**रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत -**

**पिता -** पुत्र केशव! (1) -------------------------- ?

**पुत्रः -** हे तात! अहं 'श्रीमद् भगवतगीतां पठामि |

**पिता** - शोभनम् , 'गीता' इति बहु प्रसिध्द: ग्रन्थ: अस्ति | 'गीता' महाभारतस्य भाग: अस्ति | यस्मिन् सप्तशत श्लोका: सन्ति |

**पुत्र:** - आम् , (2) -------------------------- |

**पिता** - सत्यम् ! किं त्वं जानासि यत् महाभारतस्य लेखक: क: अस्ति ?

**पुत्र:** - आम् , पिता (3) --------------------------|

**पिता** - उत्तमम् , संस्कृतस्य प्रसिध्दौ ग्रन्थौ कौ ?

**पुत्र:** - अहं मन्ये (4) -------------------------- |

**पिता** - सत्यम् , त्वं बहु जानासि | अहं बहु प्रसन्न: अस्मि |

**पुत्र:** - धन्यवाद: पित!(5) -------------------------- |

मञ्जूषा

| |
|---|
| 1 अस्य लेखक: महर्षि: वेदव्यास: अस्ति \| |
| 2 त्वम् एताावद् ध्यानेन किं पठसि ? |
| 3 अहं पठामि अत: जानामि \| |
| 4 एतौ प्रसिध्दौ ग्रन्थौ 'रामायणम्' 'महाभारतम्' च स्त: \| |
| 5 एतेषु श्लोकेषु श्रीकृष्णस्य ज्ञानवर्धका: उपदेशा: सन्ति \| |

## 'ग'भाग:

## अनुप्रयुक्तव्याकरणम् (25 अङ्का: )

**5 . अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धि सन्धिविच्छेदं वा कृत्वा पुन: लिखत-( केवलंप्रश्नचतुष्ट्यम् ) 1×4= 4**

1 ) मन: तु **चं + चलम्** अस्ति |

2 ) **तदेतद्** राजभवनं परित्यज्य वनं गच्छाम: |

3 ) **मिलित्वा + एव** मोदध्वं जीवनं रसमयं च कुरूध्वम् |

4 ) जीवा: **सर्वेऽत्र** मोदन्तां भावयन्त: |

5 ) **प्रिय + छात्र:** ध्यानेन श्रृणुत |

**6 . अधोलिखितवाक्ययेषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चिनुत -( केवलंप्रश्नचतुष्ट्यम् ) 1×4= 4**

1 ) उद्याने अनेकानि **पत्रपुष्पलता:** सन्ति |

(क) पत्राणि च पुष्पं च लता च (ख) पत्रं च लता च पुष्पं च

(ग) पत्रे च पुष्पा च लता: च (घ) पत्राणि च पुष्पाणि च लता: च

2 ) **सूपकारा:** अर्थज्वलितकाष्ठेन मेषं ताडितवन्त: |

(क) सूपस्य आकारा: (ख) सूपं करोति इति

(ग) सूपं कुर्वन्ति इति (घ) सूपं पिबन्ति इति

3 ) वानरयूथपते: वचनम् **न श्रध्देयं** मत्वा कपय: अहसन् |

(क) निर्श्रध्देयम् (ख) अश्रध्देयम्

(ग) अनुश्रध्देयं (घ) आश्रध्देयं

4 ) विद्यालये **<u>पुस्तकानां संग्रह:</u>** अस्ति |

(क) पुस्तकसंग्रह: (ख) पुस्तके संग्रह:

(ग) सपुस्तकम् (घ) पुस्तकस्यसंग्रह:

5 ) वानरयूथप: **<u>विषादेन सहितम्</u>** अवदत् |

(क) निर्विषादम् (ख) स्मविषादम्

(ग) विषादस्य अभाव: (घ) सविषादम्

**7 . अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं प्रदत्तविकल्पेभ्य: चिनुत - (केवलंप्रश्नचतुष्टयम्)** **1×4= 4**

1 ) राज्ञ: **<u>दानशीलताम्</u>** आकर्ण्य जना: आयान्ति स्म |

(क) दानशील + टाप् (ख) दानशील + मतुप्

(ग) दानशील + त्व (घ) दानशील + तल्

2 ) सर्वेषां **<u>महत्वं</u>** यथासमयम् |

(क) महत् + टाप् (ख) महत् + मतुप्

(ग) महत् + त्व (घ) महत् + तल्

3 ) राजा उवाच- ' **<u>भग</u> + <u>मतुप</u>** भवत्मनोरथं अहं पूरितवान् |

(क) भगवती (ख) भगवान्

(ग) भगमान् (घ) भगवन्त:

4 ) भारतस्य **<u>भूगोल</u> + <u>ठक्</u>** स्थिति: अनुकूला अस्ति |

(क) भौगोलिकी (ख) भौगोलिका

(ग) भौगोलिकम् (घ) भौगोलिक:

5 ) महिला: **<u>बुध्दिमत्य:</u>** सन्ति |

(क) बुध्दि + टाप् (ख) बुध्दि + मतुप्

(ग) बुध्दि + त्व (घ) बुध्दि + तल्

**8 . वाच्यस्य नियमानुगुणम् उत्तरं विकल्पं चिनुत -( केवलं प्रश्नत्रयम् )** **1×3= 3**

महेश: - गणेश! इदानीं त्वया किं क्रियते ?

गणेश: - महेश! अधुना तु मया (1) ----------- क्रियते | का वार्ता ?

महेश: - नास्ति विशेष: |(2) ----------- क्रीडितुं बहि: गम्यते ,त्वमपि आगच्छ |

गणेश: - न | श्व: मम परीक्षा भविष्यति अत: अद्य (3) ----------- सम्पूर्णदिने पठामि |

महेश: - अस्तु , किन्तु त्वं किं पठसि ?

गणेश: - गणितविषयस्य परीक्षा भविष्यति अत: मया गणितविषय: (4) -----------|

**मञ्जूषा**

| |
|---|
| **अस्माभि: , पठ्यते ,अध्ययनम् , अहम्** |

**9 . कालबोधकशब्दै: अधोलिखित-दिनचर्यां पूरयत - ( केवलंप्रश्नत्रयम् )** **1×3= 3**

1) हावडा एक्सप्रेस: रेलयानम् 7 : 45 ----------- वादने कोलकत्तानगरं गच्छति |

2) महालक्ष्मी एक्सप्रेस: रेलयानम् 08 : 30 ----------- वादने कोल्हापुरम् आगच्छति |

3) 09 : 15 -----------वादने कामाख्या एक्सप्रेस: रेलयानं गुवाहाटीं गच्छति |

4) जम्मू तावी एक्सप्रेस: रेलयानम् 12: 00 ----------- वादने जम्मू नगरम् आगच्छति |

**10. मञ्जूषायां प्रदत्तै: उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -वाक्यानुगुणम् उचिताव्ययपदं चिनुत - ( केवलं प्रश्नचतुष्टयम् )** **1×4= 4**

1) ----------- धूम: तत्र अग्नि: भवति |

2) महीपाल: द्वितीयम् ------------ नेत्रम् तस्मै ददौ |

3) ------------ कथा श्रूयते तावत् मा गच्छ |

4) कच्छप:------------ चलति |

5) मूर्खजना: समयं ------------ यापयन्ति |

**मञ्जूषा**

| |
|---|
| **यावत् , यत्र , शनै: , अपि , वृथा** |

**11 . अधोलिखितवाक्येषु रेखाङ्कित-अशुध्दपदाय उचितं पदं चित्वा वाक्यानि पुन: लिखतु -(केवलं प्रश्नत्रयम् )**

**1×3= 3**

1) चतस्र: <u>**बालका:**</u> पठन्ति |

(क) बालकः (ख) बालिका (ग) बालिकाः (घ) बालकानि

2) सैनिकाः शक्तिमन्तः **<u>अस्ति</u>** ।

(क) भविष्यति (ख) भविष्यन्ति (ग) भविष्यामः (घ) भविष्यसि

3) **<u>त्वम्</u>** लेखं लिखामि ।

(क) अहम् (ख) आवां (ग) वयं (घ) अनन्य

4) तस्य **<u>मित्राः</u>** आसन् ।

(क) मित्रम् (ख) मित्रौ (ग) मित्रे (घ) मित्राणि

## भागः 'घ'

## पठितावबोधनम्

**12 . अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत :**

तस्य वचनम् अश्रध्देयं मत्वा मदोध्दताः कपयः प्रहस्य अवदन् - 'भो! किमिदम् उच्यते ? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः।' तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्‌गदम् उक्तवान् - 'रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ । अहं तु वनं गच्छामि ।'अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति । तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः ।

**1 ) एकपदेन उत्तरत : ( केवलं प्रश्नद्वयम् )** **½×2= 1**

(क) मेषस्य क्षितौ प्रलुठतः तृणेषु काः समुत्थिताः ?
(ख) केन अर्धज्वलितकाष्ठेन ताडितः ?
(ग) यूथपतेः वचनम् अश्रध्देयं मत्वा के प्रहसन् ?

**2 ) पूर्णवाक्येन उत्तरत : ( केवलं प्रश्नद्वयम् )** **1×2= 2**

(क) मदोध्दताः कपयः वानरयूथपतिं किम् अवदन् ?
(ख) यूथपतिः सगद्‌गदम् किं उक्तवान् ?
(ग) ऊर्णाप्रचुरः मेषः वह्निना किम् अकरोत् ?

**3 ) निर्देशानुसारम् उत्तरत : ( केवलं प्रश्नद्वयम् )** **1×2= 2**

(क) **'जानीथ'** क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?
(ख) **'मेषः'** इति पदस्य किं विशेषणपदं प्रयुक्तम् ?
(ग) **'वने'** इत्यर्थे किं पदं प्रयुक्तम् ?

**13 . अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।** **5**

कामः एषः क्रोध एष रजोगुणसमुद्‌भवः। महाशनो महापाप्मा विध्दयेनमिह वैरिणम् ॥
शक्नोतिहैव यः सोढुं प्राक् शरीरविमोक्षणात् । कामक्रोधोद्‌भवं वेगं सः युक्तः स सुखी नरः ॥

**1 ) एकपदेन उत्तरत : ( केवलं प्रश्नद्वयम् )** **½×2= 1**

(क) कामः कस्मात् गुणात् सम्भवति ?
(ख) नरः कामक्रोधोद्‌भवं किं सोढुं शक्नोति ?
(ग) रजोगुणात् किं सम्भवति ?

**2 ) पूर्णवाक्येन उत्तरत : ( केवलं प्रश्नद्वयम् )** **1×2= 2**

(क) कीदृश: नर: सुखी भवति ?

(ख) काम: क्रोध: कीदृश: विध्दि ?

(ग) नर: कस्मात् पूर्वम् वेगं सोढुं शक्नोति ?

**3 ) निर्देशानुसारम् उत्तरत : ( केवलं प्रश्नद्वयम् )** **1×2= 2**

(क) **'पूर्वम्'** इत्यर्थे किं पदं प्रयुक्तम् ?

(ख) **'मित्रम्'** इति पदस्य किं विलोमपदं प्रयुक्तम् ?

(ग) **'सुखी:'** इति पदस्य किं विशेष्यपदं प्रयुक्तम् ?

**14 . अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत |** **5**

मयूर: - ( प्रविश्य सट्टहासम् ) सत्यं सत्यम् | अहमेव राष्ट्रपक्षी | को न जानाति तव ध्यानावस्थाम् ? मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि | धिक् त्वाम् | अवमानितं खलु सर्व पक्षिकुलं त्वया |

काक: - रे सर्पभक्षक:! नर्तनात् अन्यत् किम् अपरं जानासि ?

मयूर: - श्रूयतां श्रूयताम्! मम नृत्यं तु प्रकृते: आराधना | पश्य! चारूवर्तुलचन्द्रिकाशोभितानां मम पिच्छानाम् अपूर्व सौन्दर्य | मम केकारवं श्रुत्वा कोकिल: अपि लज्जते | मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराज: कृत: |

**1 ) एकपदेन उत्तरत : ( केवलं प्रश्नद्वयम् )** **½×2= 1**

(क) क: राष्ट्रपक्षी अस्ति ?

(ख) कस्य केकारवं श्रुत्वा कोकिल: अपि लज्जते ?

(ग) मयूरस्य नृत्यं कस्या: आराधना ?

**2 ) पूर्णवाक्येन उत्तरत : ( केवलं प्रश्नद्वयम् )** **1×2= 2**

(क) मौनं धृत्वा बक: किम् अकरोत् ?

(ख) काक: किम् अकथयत् ?

(ग) विधात्रा कथं मयूर: पक्षिराज: कृत:?

**3 ) निर्देशानुसारम् उत्तरत : ( केवलं प्रश्नद्वयम् )** **1×2= 2**

(क) **'आकर्ण्य'** इत्यर्थे किं पदं प्रयुक्तम् ?

(ख) **'असत्यम्'** इति पदस्य किं विलोमपदं प्रयुक्तम् ?

(ग) **'पिच्छानाम्'** इति पदस्य किं विशेषणपदं प्रयुक्तम् ?

**15 . रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरूत | ( केवलं चतुष्टयम् )** **1 × 4 = 4**

1 ) हंस: **वर्षर्तौ** तु मानसं पलायते |

2 ) **दानशालासु** विचरन् राजा अचिन्तयत् |

3 ) अश्वा: **प्राणत्राणाय** इतस्तत: अधावन् |

4 ) **विषयान्** उपभोगेन तेषु आसक्ति: जायते |

5 ) **सत्येन** समं सुखं नास्ति |

**16 . मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुन: लिखत |** **½×4= 2**

**अपूर्व: कोऽपि कोशोऽयं विद्यते तव भारति! व्ययतो वृध्दिमायाति क्षयमायाति सञ्चयात् ||**

**अन्वय: -** भारति! **(1)----------** अयं कोश: क: अपि अपूर्व: **(2)----------** | व्ययत: **(3)----------** आयाति सञ्चयात् च **(4)----------** आयाति |

**मञ्जूषा**

| **वृध्दिम् , तव , क्षयम् , विद्यते** |
|---|

**मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा तं पुन: लिखत |** **½×4= 2**

**काक: कृष्ण: पिक: कृष्ण: को भेद: पिककाकयो: | वसन्तसमये प्राप्ते काक: काक: पिक: पिक: ||**

**भावार्थ: -** काकस्य वर्ण: कृष्ण: **(1)----------** अपि वर्ण: **(2)----------** भवति | वर्णसदृशौ तौ | एतयो: भेद: तु **(3)---------** एव ज्ञायते यत् काक: काक: पिक: च पिक: अस्ति | यत: पिकस्य स्वर: **(4)----------** भवति काकस्य च कर्कश: |

| **मधुर: , कृष्ण: , पिकस्य , वसन्त-ऋतौ** |
|---|

**मञ्जूषा**

**17 . अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंङ्गानुकूलम् उचितार्थं चित्वा पुन: लिखत -** **3 × 1 = 3**
**(केवलं प्रश्नत्रयम्)**

1 ) **<u>अनृतं</u>** वदसि चेत् काक: दशेत् |
(क) नृत्यम् (ख) असत्यम् (ग) सत्यम् (घ) अनादरम्

2 ) अहर्निशं **<u>महानसं</u>** प्रविश्य यत् पश्यति तद् भक्षयति स्म |
(क) पुस्तकालयम् (ख) अश्वशालाम् (ग) भोजनशालाम् (घ) राजभवनम्

3 ) **<u>महाशनो</u>** महापाप्मा विध्दयेनमिह वैरिणम् |
(क) महाबली (ख) महाज्ञानी (ग) महाशय (घ) बहुभोजी

4 ) मदोध्दता: **<u>कपय:</u>** प्रहस्य अवदन् |
(क) वानरा: (ख) अश्वा: (ग) मेषा: (घ) गजा:

**18 . अधोलिखित- कथां रिक्तस्थानानि पूरयित्वा पुन: लिखत -** **½×8= 4**

| **मञ्जूषा -** प्राणत्राणाय ,मदोध्दता: , गुरूजनोपदेशस्य ,महानसं , अर्धज्वलितकाष्ठेन ,राजवैद्यम् ,चन्द्रस्य पुत्रा: ,सूपकारै: , |
|---|

भूपते: (1) --------- वानरान् भोज्यपदार्थै: पुष्टिं नयन्ति स्म | राजगृहे बालवाहनयोग्यं मेष: जिह्वालोलुपतया (2) --------- प्रविश्य भोजनं खादति स्म | (3) --------- नित्यं ताडितं मेषं दृष्ट्वा वानरयूथप: वानरान् राजभवनं त्यक्तुम् अकथयत् | रसनास्वादलुब्धा: (4) --------- मर्कटा: तद् राजभवनं त्यक्तुं न स्वीकृतवन्त: | अन्यस्मिन् अहनि स मेष: सूपकारेण (5) ------- ताडित: | ज्वलन् स मेष: अश्वशालां प्रविष्ट: | परिणामत: दग्धा: अश्वा: (6) ---------- अधावन् | राजा (7) ------- आहूय अश्वरक्षायै न्यवेदयत् | भयत्रस्ता: कपय: (8) ---- अवधीरणात: पश्चात्तापं कृतवन्त: |